

# प०पू० जगद्गुरु शंकराचार्य स्वामी जयेन्द्र सरस्वती जी महाराज

मुक्तिदायिकासु प्रसिद्धासु सप्तसु अन्यतमेयं मायापुरी। अत्र हरिद्वारक्षेत्रे विराजते जयराम–आश्रमः। जयराम–आश्रममाध्यमेन बहुविधं सेवाकार्यं निरन्तरं प्रचलति। शिक्षाक्षेत्रे, चिकित्साक्षेत्रे, सन्तसेवाक्षेत्रे, संस्कृतसेवाक्षेत्रे, गोसेवाक्षेत्रे च जयराम–आश्रमस्य महानुपक्रमः द्रष्टुं शक्यते।

जयराम–आश्रमस्य वर्तमानपरमाध्यक्षानाम् ब्रह्मस्वरूप ब्रह्मचारीमहाराजानामभिनन्दनमभिलक्ष्य "योगः कर्मसु कौशलम्" ग्रन्थः प्रकाश्यते इति विषयमवगम्य सन्तुष्टाः स्मः।

भगवतः परमेश्वरस्य परमया कृपया ग्रन्थोऽयं धर्मपथः विस्मृतवतां मानवानां सत्पथप्रदर्शकं विलसतु इत्याशास्महे!

नारायणस्मृतिः
श्री स्वामीजयेन्द्रसरस्वतीवर्याः